# Skandaproktam Somarudrarchanamahattvam

# સ્કન્દપ્રોક્તં સોમરુદ્રાર્ચનમહત્ત્વમ્

## Document Information

Text title : Skandaproktam Somarudrarchanamahattvam

File name : somarudrArchanamahattvamskandaproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 14 | 135-153||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં સોમરુદ્રાર્ચનમહત્ત્વમ્

ઉમયા સહિતો દેવઃ સોમ ઇત્યભિધીયતે ।
ઉમા જ્ઞાનમયી શક્તિઃ સૈવ વિદ્યેતિ ગીયતે ॥ ૧૩૫॥

વિદ્યાઃ સર્વા ઉમારૂપા વિદ્યાનામીશ્વરઃ શિવઃ ।
વિષ્ણુબ્રહ્માદિદેવાનાં પ્રભુઃ સામ્બઃ સદાશિવઃ ॥ ૧૩૬॥

રુદ્રપિણ્ડસમુત્પન્ના બ્રાહ્મણા રુદ્રદેવતાઃ ।
તતઃ કાર્યં દ્વિજૈર્નિત્યં શ્રીરુદ્રસ્યૈવ પૂજનમ્ ॥ ૧૩૭॥

દેવાશ્ચ બ્રાહ્મણોત્પન્નાઃ શિવાન્યા બ્રાહ્મણાઃ સુરાઃ ।
તતો દેવૈશ્ચ કર્તવ્યં રુદ્રસ્યૈવ હિ પૂજનમ્ ॥ ૧૩૮॥

વિશ્વાધિકો ઋષી રુદ્રો મહાન્યદ્યપિ સ સ્વયમ્ ।
તથાપિ નિત્યોઽજન્યત્વાદ્ભાવજ્ઞાનાત્મકઃ સ્વયમ્ ॥ ૧૩૯॥

સ્વાધિકઃ પૂજ્યતે લોકે પૂજા ચ સ્વાધિકે મતા ।
સ્વતોઽધમે ચ તુલ્યે વા પૂજા નૈવ વિધીયતે ॥ ૧૪૦॥

ન શિવાદધિકો યસ્માદ્વિશ્વાધિક ઇતિ શ્રુતઃ ।
સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૧૪૧॥

સ ભૂમિં વિશ્વતો વૃત્વા અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ।
પુરુષ એવેદં સર્વં યદ્ભૂતં યચ્ચ ભવ્યમ્ ॥ ૧૪૨॥

ઉતામૃતત્ત્વસ્યેશાન્નો યદન્નેનાતિરોહતિ ।
એતાવાનસ્ય મહિમા અતોજ્યાયાંશ્ચ પુરુષઃ ॥ ૧૪૩॥

પાદોઽસ્ય વિશ્વાભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ ।
ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષો દેવદેવોત્તોમોત્તમઃ ॥ ૧૪૪॥

પુરુષો વૈરુદ્ર (ઇત્યેવ) શ્રુતિરેષા યતો મતા ।
યો રુદ્રોઽગ્નાવપ્સુ રુદ્રો યો રુદ્રસ્ત્વોષધીષ્વપિ ॥ ૧૪૫॥

યો વિશ્વા ભુવનાન્યેકો વિવેશ સ પરાત્પરઃ ।
વિશ્વં ભૂતં ચ ભુવનં ચિત્રં ચ બહુધા તુ યત્ ॥ ૧૪૬॥

તજ્જાતં જાયમાનં ચ રુદ્રાદ્રુદ્રાત્મકં વિદુઃ ।
ઋચો યજૂંષિ સામાનિ રુદ્રાદેવ હિ જજ્ઞિરે ॥ ૧૪૭॥

છન્દાંસિ જજ્ઞિરે રુદ્રાજ્જજ્ઞિરે વિવિધાઃ પ્રજાઃ ।
સોમો મત્તાનાં જનિતા સોમો હિ જનિતા દિવઃ ॥ ૧૪૮॥

સશૈલાયાઃ પૃથિવ્યાશ્ચ જનિતા સોમ એવ હિ ।
અગ્નેશ્ચ જનિતા સોમો નાન્યસ્ય જનિતા ધ્રુવમ્ ॥ ૧૪૯॥

સૂર્યાણાં જનિતા સોમો દ્વાદશાનામપિ પ્રભુઃ ।
ચન્દ્રસ્ય જનિતા સોમઃ કલાનાં જનિતા તથા ॥ ૧૫૦॥

રુદ્રસ્ય જનિતા સોમો યમસ્ય વરુણસ્ય ચ ।
વિષ્ણોશ્ચ જનિતા સોમો બ્રહ્મણઃ પવનસ્ય ચ ॥ ૧૫૧॥

નદીનાં જનિતાં સોમઃ સમુદ્રાણામપિ પ્રભુઃ ।
મનસો જનિતા સોમઃ સ્કન્દસ્ય ગણપસ્ય ચ ॥ ૧૫૨॥

આકાશસ્યાપિ જનિતા ચૌષધીનામપામપિ ।
બ્રહ્મણો રુદ્રમભ્યર્ચ્યમનભ્યર્ચ્ય તુ યો ભ્રમાત્ ॥ ૧૫૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં સોમરુદ્રાર્ચનમહત્ત્વં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૪ । ૧૩૫-૧૫૩ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 14 . 135-153 ..

Encoded and proofread by Ruma Dewan

*Skandaproktam Somarudrarchanamahattvam*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*